दिनाङ्क :-13.03.2025

प्रात: - 06:55

**प्रधानमन्त्री - मॉरीशस यात्रा**

भारत- मॉरीशसदेशौ स्वसम्बन्धान् वर्धित-सामरिकसहभागित्वं प्रति अधिगतवन्तौ अपि च सागरीय- सुरक्षां समेत्य अनेकेषु क्षेत्रेषु सहयोगं समेधितुं स्थानीयमुद्रासु व्यापारं च वर्धायितुं अष्ट सन्धिपत्राणि हस्ताक्षरितवन्तौ। एषः निर्णयः प्रधानमन्त्रिणः नरेन्द्रमोदिनः मॉरीशसदेशस्य प्रधानमन्त्रिणः डॉ. नवीनचन्द्र-रामगुलाम इत्येतस्य मध्ये पोर्टलुइस इत्याख्ये स्थले प्रतिनिधिमण्डल-स्तरीय-वार्तावधौ निर्णीतः। वार्तानन्तरं श्रीमोदी वैश्विकदक्षिणाय भारतस्य नवीनस्य द्वक्पातस्य घोषणां विहितवान्। तस्य नाम महासागरः उत वा क्षेत्रेषु सुरक्षायाः विकासस्य च कृते पारस्परिकी प्रगतिः इति कृतवान्। उपवेशनावधौ श्रीमोदी एतस्मिन् क्षेत्रे उभयोः देशयोः संयुक्त लक्ष्यान् अवलोक्य मॉरीशस- देशाय रक्षा-सुरक्षावश्यकतायाः प्रबलीकरणे भारतस्य सततं समर्थनं साहाय्यं च पुनरावर्तितवान्। मॉरीशदेशस्य द्विदिवसीययात्रायाः द्वितीये अन्तिमे च दिवसे प्रधानमन्त्री मॉरीशसदेशस्य राष्ट्रियदिवससमारोहे भागं स्वीकृतवान्। अत्रावधौ मॉरीशस-देशस्य राष्ट्रपतिः धरमबीर-गोखूलः भारत-मॉरीशसदेशयोः सहकार्येषु तस्य अप्रतिमयोगदानाय श्रीमोदिने ग्रैन्ड कमाण्ड ऑफ द ऑर्डर ऑफ द स्टार एण्ड की ऑफ द इण्डियन ओशन इतीदं सम्मानं प्रदत्तवान्। एतदनन्तरं प्रधानमन्त्री मॉरीशसदेशस्य यात्रां सम्पूर्य भारतं प्रत्यागतवान्।

**लोकसभा- विधेयकमम्**

लोकसभायाः स्वीकृतेः अनन्तरं संसदा तैलक्षेत्रं- विनियमनं विकास- संशोधनं विधेयकं चतुर्विंशत्यधिक- द्विसहस्रतमवर्षीयं पारितम्। इदं तैलक्षेत्रविधेयकम् अष्टचत्वारिंशदधिक- नवदशशततमे संशोधनं कर्तुमिच्छति। इदं संशोधितविधेयकं

खनिजतैलानां परिभाषां विस्तारयति। यस्मिन् प्राकृतिकरूपेण समुपलब्धाः हाइड्रोजन- कोलबेडमीथेन- शेल- वायवः सम्मिलिताः वर्तन्ते। विधेयके एतस्मिन् स्पष्टं जातम् यत् कृष्णाङ्गार-लिग्नाइट- हीलीयम- इत्यादयः खनिजतैलेषु नैव सम्मिलिताः भविष्यन्ति। एकस्य प्रश्नस्य प्रत्युत्तरे प्राकृतिकवायुमन्त्री हरदीपसिंह पुरी सूचितवान् भारतं वर्तमानसमये चत्वारिंशद्देशेभ्यः आयातं कोरतीति। भारतम् आपूर्ति-स्रोतानां मध्ये भिन्नतां नैव प्रदर्शयति। अत्रावधौ होलीपर्व समाश्रित्य संसदः उभयोः सदनयोः कार्याचरणं सोमवासरं यावत् स्थगितम्।

## पाकिस्तानदेशः

पाकिस्तानदेशे बोलनजनपदे जाफर-एक्सप्रेस- इत्येतस्मिन् यात्रिणां रेलयाने जाताक्रमणस्य अनन्तरं बलूच-लिबरेशन-आर्मी इत्येतस्य बलस्य योद्धृणां पाकिस्तानदेशीय- सेनायाः मध्ये गतिरोधः चतुर्विंशतिहोरायाः पश्चादेव सम्पन्नः। सुरक्षासूत्रानुसारि आक्रमणकारिणः निष्प्रभावयितुं बन्धकानां रक्षणार्थं च सैन्याभियानम् सम्पन्नम्।

## वैष्णव स्टारलिङ्क

केन्द्रीयसूचनाप्रसारणरेलमन्त्री अश्विनीवैष्णवः स्पेसएक्स इत्येतस्य स्टारलिंक इत्येतस्य उपक्रमस्य भारतीयापणे प्रवेशानन्तरं तस्य स्वागतं कृतवान्। उक्तवान् च यत् एतद्धि दूरवर्तिनां क्षेत्राणां रेलपरियोजनाभ्यः उपयोगी वर्तते।

## क्रिकेट्- प्रतिस्पर्धायाम्

वीमेन्स-प्रीमीयर-लीग-इत्येतस्यां क्रिकेट्- प्रतिस्पर्धायाम् अद्य सायंकाले मुम्बय्याः ब्रेबौर्न- क्रीडाङ्गणे मुम्बईइण्डियन्स - गुजरातजायन्ट्स- दलयोर्मध्ये अपनयनात्मके द्वन्द्वे प्रतिस्पर्धा भविष्यति। स्पर्धायाः प्रसारणं सार्धसप्तवादने भविष्यति। दिल्ली

- कैपिटलस्य दलं पूर्वमेव दशाङ्कैः सह शीर्षस्थानं सम्प्राप्य प्रतियोगितायाः निर्णायकचक्रे प्रविष्टवत्।